IJAER/Aug-Sept 2013/Volume-2/Issue-2 ISSN: 2278-9677

International Journal of Arts & Education Research

# अथर्ववेदीयसूक्तीनां विमर्शः

**पं. रामदेवदीक्षितः**

व्याख्याता – यजुर्वेद

राजकीय महाराणा आचार्य संस्कृत महाविद्यालय, उदयपुर

- **शतहस्त समाहर सहस्रहस्त संकिर। 3/24/5**

अथर्ववेदीयसुभाषितार्थं विवक्षता विमर्शञ्च विधित्सता विव्रियते मयकेह तत्त्वार्थः। भगवता वेदेन यदुक्तं समादिश्यत् यद्धे ऋत्विजः! दानादानमुभयं लोकहिताय स्यादतो न समाहार केवलमपितु संकिर। अत्रेदमवध्येयमवधातव्यं कथं केन समाहर, केन कथम्बासंकिर इति? अत्रोद्यते शतहस्तेन आदेहि, सहस्रहस्तेन प्रदेहीति। अस्याशयमादानापेक्षया दानं गुरुतरं पुण्यदायकमादिष्टम्। अद्येदं सूक्तं सर्वथौचित्यं भजमानमवतिष्ठते। अद्य केवलं समाहरेति शब्देन सम्बोध्यते लोकः। तुलसीदासीयं निर्दर्शयामि **"मात पिता बालकहिं बुलावहि, उदर भरे सोइ धर्म शिखावहि।"**

पाणिनिकालेऽप्यस्योदरम्भरिशब्दः प्रचलितस्तदर्थन्तेन सूत्रं ग्रथितम्। यत्स्वार्थन्तदवगम्यते यन्न तत्तदपहीयते। कालिदासोक्तमिह सरीस्मरता तत्सूक्तमूर्ध्वतनाशयं वेदोक्तमेव मण्डयद्दृश्यते तदिहोपन्यस्यते –

**"सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।"**

दिनमणेः रसस्यादानं सहस्रगुणितं प्रदातु भवतीत्याशयः। महतां सतामिदं लक्षणम्, आदानापेक्षयाधिकतरदानन्तथैवेह कुलगुरुणा कविना निवेदितन्तदवगन्तव्यं तथा चरणीयञ्च। **"याचितारश्च नः सन्तु मा च याचिस्म किंचन।"**

अस्माभिर्याचकेभ्य दातव्यन्न क्वापि याचितव्यं कमपीति। कस्यचित्सतो निगदितमाह–

**"देनहार कोई और है देत रहत दिन रैन"**

**लोग भरम मो पे करे तासो नीचे नैन॥**

दातेश्वरः सर्वस्मै यथाकर्म दत्ते, शांसयिकैरस्माभिरात्मानं दातारमितिमत्वा मिथ्याभ्रमाब्धौ निमज्ज्यत इति मादृक्षाणां मनुष्याणां विडम्बनमेव। सतामियमुक्तिरस्मभ्यमवधेयं सन्देशं वितरत्यमोधञ्चेति मे मतम्। रश्मिरभिकारेण साधूक्तं **"दान प्रकृति का नियम धर्म है।"** अस्माभिस्सर्वदा कस्मैचित्प्रशंसा प्रदीयत एव चान्ते तु प्राणसमवायोऽपि यमाय लोकपालाय दीयते एवं दानं हि प्रकृते र्नियतो धर्मः। द्रविणसंग्रहो कथमित्युक्ते चाह त्यागाय अकिञ्चनेभ्य सम्बन्धिभ्यो गोभ्योऽतिथिभ्यश्च। रघुवंशे इक्ष्वाकुवंशीयानां महीभृतामियमुक्तिर्यथा – **"त्यागाय सम्भृतार्थानाम्।"**

- **"तैत्तरीयोपनिषदि महर्षिणा साध्वभिहितं" श्रद्धया देयम्। अश्रद्धया देयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्।** संविदा देयम्। ०१– ११ तैत०

इह कथञ्जातीयकं दानमिति पृष्टस्योत्तरं ददानेन ऋषिणोक्तं समस्तमूर्ध्वतनं वृत्तमस्याशयस्तु कथमपि दातव्यमिति संदिष्टन्तदस्माकं ग्रहीतव्यम्। सुभाषितकारेणाधि–सूक्तमुक्तमुच्चौस्तदत्र पुरस्ताद्विमृश्य किञ्चिदूच्यते –

**विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय।**

**खलस्य साधोर्विपरीतमेतज्ज्ञानाय दानाय च रक्षणाय॥**

धनस्य प्रयोजनं किमिति सम्प्रोच्य चाह द्रविणं दानायेति सतामनुकूलम्। असतान्तु मदाय तदिति लोकेषु अहर्निशमालक्ष्यत एव। दानमुपकाराय भवति, उपकारश्च सतामात्मा। अयमेवोपकारो यदि परस्मै स्यात्तर्हि परोपकारनाम्नाभिगीयते। पुराणेष्वस्याभिचर्चानिशं विहिता दरीदृश्यते यथा –

**अष्टादश पुराणेषु व्यासस्य वचनद्वयम्।**

**परोपकारः पुण्याय पापाय परपीडनम् ॥**

रामायणेऽमुष्य विषये तुलसीदासेन भाषान्तरं विधाय सत्यमुचितञ्चोक्तं यदा –

**"परहित सरिस धर्म नहीं भाई पर पीडा सम नहीं अधमाई।"**

सतां लक्षणं भर्तृहरिणा यदभिहितन्तदत्र प्रदर्श्य पुरस्तादस्य वैलक्षण्यं शस्यते –

**"सन्तः स्वयं परहिते विहिताभियोगः।"**

स्वस्वार्थपरित्यागे सत्यपरकार्यसाधकत्वं सतां वैलक्षण्यं तदेव नीतिशतके पद्येऽभिगीतम् –

**"सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्।"**

स्वार्थं परित्यज्य परेषां हिताचरकत्वं वस्तुतः देवतात्वं भजमानमालक्षितम्। स्वार्थघटकानां समवायोऽद्य बहुशः एधमानो लोक्यतेऽतो हेतोरद्यैतादृक्षाणां सुभाषितानां विश्वस्मिन् प्रचारः प्रसारः विस्तारश्चापरिहार्यः। द्रविणमद्य सर्वेषां मनांसि निर्मथ्य सुरसामुखमपि न्यूनीकृत्य सर्वत्र राजते। नास्माभिरभिज्ञायते यदिदं त्रिधा विभज्योपभुज्यते। असदीया गतिस्तिस्र इति नीतिः नीतिजुषां वाणिज्यव्यवहृतिभृतां नृणाम्। दानं भोगो नाशः। अधिके सति पात्राय दातव्यं, भोक्तव्यं यथाशक्ति, दानभोगाभ्यां रहितस्यास्य विनाशो ध्रुवमेव। यज्जलमेकत्र तिष्ठते तत्र विषाणूनां विकासः। चलति जले न तथा दोषः। तथा द्रविणे समूलीकृते तत्र विकृतिः। तस्मिन् गच्छति तत्र बुद्धिरिति शास्त्रवचांसि –

**दानं भोगो नाशः तिस्रः गतयो भवन्ति वित्तस्य।**

**यो न ददाति न भुंक्ते तस्य तृतीया गतिर्भवति॥**

गीता तु पात्रापत्रे विमृश्य दातव्यमिति प्रोच्चम्प्राह यथा तत्रोक्तं पद्यं प्रमाणम् –

**दातव्यमिति यद्दानं दीयतेऽनुपपकारिणे।**

**देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥** १७–२० गीता

अनुपकारिण इत्युक्ते प्रत्युपकारनिषेधोऽभिगीतः। यदि तत्तथा न तद्दानं सात्त्विकम्। प्रत्युपकारार्थं फलमभिमृश्य चेद्दानं दीयते तद्राजसमिति तत्रैव भगवान् कृष्णः जगाद यथा –

**यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।**

**दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्॥** १७–२१

एताभ्यां द्वाभ्यां विरहितस्य दानस्य तामसत्वमिति संज्ञा तदिह यथा –

**अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।**

**असत्कृतमवज्ञातं तत्तामसमुदाहृतम्॥** १७–२२

सात्त्विकाय दानाय प्रतिफलाभावो गणितः। अयमेव सम्प्रविचारः **"नेकी कर कूँवां में डाल"** इति प्रोच्यते। विदुराभिप्रायस्तु महाभारतेऽस्य सन्दर्भे चेत्थं यत्कृच्छ्रेणोपार्जितस्य द्रविणस्य परस्मै दातव्यं महते कष्टाय जायते तथापि तस्मात्किञ्चिदपि दातव्यमेव दानं हि यज्ञाय कल्प्यते। यज्ञे दानं, दानमन्तरेण यज्ञाभावः, यज्ञाभावे पर्जन्याभावः, तदभावेऽन्नाभावः पुनस्तदभावे जीवविनाशः अतो हेतो दातव्यं प्रकृतेर्नियमितो नियमः। अयम्मे यज्ञीयचक्रप्रचारविचारः गीतेदं चक्रमित्थमिंगयन्ती प्राह –

**एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः।**

**अद्यायुरिन्द्रियारामो मोधं पार्थ स जीवति॥** गीता

सात्त्विकतां भजमानस्य दानस्याभिलक्षणं व्याकृताविथ्थं प्रोक्तं पाणिनीय– सूत्रेऽमुष्मिन् **"दानस्य कर्मणा यमभिप्रैति स सम्प्रदान"**मित्यभिहिते यथा **"स्वसत्त्वनिवृत्तिपूर्वकं परसत्त्वोत्पादनं दानम्।"** फलप्रतिवान् यो महान् दत्ते स दाता। अतथात्वे नाममात्रमेव। दानन्तद् सतां गर्हितमेवा गर्हितं यत्तद्दातव्यमप्यदातव्यमेवेति संविभाव्य तथा विम्रष्टव्यमिति ममाशयः। भैरवझोपाख्येनोपात्तं पद्यमभिभाव्यास्माद्विरमामि।

**प्रतिफलमनादृत्य पात्राय यद्धि दीयते।**

**धर्ममूलमिदं दानं दाता पुण्याय कल्प्यते॥**

**उपार्ज्य व्यभिचाराद्धि दानं यद्दीयते नरैः।**

**तन्न दानं कथं दानं न्यूनपुण्याय जायते॥**

**एकाम्रवृक्षरोपाद्धि फलानि समुयन्ति ते।**

**मालिनः हि यथा लोके तथा पुण्यानि सर्वदा॥**

➢ **"उत्तिष्ठ नारि तवसं रभस्व" अथर्व० ११६१६१४**

नार्युत्थाभिधायकस्यास्य मन्त्रस्य सर्वथौचित्यमधिसमाजं जागरितव्यमित्याशयमध्यात्ममधिगृह्य सुभाषितमिदं भाषानिबन्धमञ्जुलतामुपैति। उत्तिष्ठेति तिष्ठतेर्मध्यमपुरुषस्यैकवचनान्तस्यार्थो नोदनम्। उत्तिष्ठ जागृहि इति यावत्। नरस्य धर्म्येति व्युत्पन्नस्य **"नृनरयोर्वृद्धिश्चेति"** वार्तिकेणास्याशयो यद्यया नरो धर्मादपेतं न स्यात्। अर्थात् नर्य्या विना नरो धर्माय नाम्नायीत। नरस्य धार्मिककृत्यसम्पादिका नारी तस्या सम्बोधने हे नारि! इतीह प्रोक्तम्। तवसं सम्मानं शक्तिम्वा रभस्व प्राप्नुहि इति यावत्। नरः नेति पुस्त्वं भजतेऽस्य स्त्रीत्वे नारीति गीयते। अथर्ववेदो हि नारीणामभ्युदयाय कृतसंकल्पस्सन् मन्त्रमिमं प्रस्तुन्वन्नुपरिशति सर्वान् यन्नारीमन्तरेण पुरुषस्य गतिर्नास्तीत्यतो तत्सम्मानाय मनोनिर्मातव्यम्। अद्य विश्वस्मिन्नियं वस्तुत्वेनोपभुज्यमानाऽसम्मानमेवाप्रोतीति दृशिमतां पुरस्तादस्ति। चक्रेणैकेन न रथो गन्तुमर्हस्तदर्थं द्वाभ्यां चक्राभ्यां भवितव्यन्तथैव न नरो नारी वा अन्योन्यमन्तरेण जीवनचक्रं चालयितुं क्षमते। अर्धांगः अर्धांगीति शब्दितस्यान्योन्यस्य निर्भरत्वमपरिहाय्यम्म्। अस्माकं देवोऽपि अर्धनारीश्वरत्वेन शब्द्यते मनुनोक्तपद्यार्थविदां वादमंगीकुर्वद्भिरस्माभिरनिशन्तत्र म्रातव्यं यथा – **"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।"** पद्यस्य प्रामाण्यं ददतो वादस्य प्रशंसायां पाणिनिनापि स्वसूत्रं ग्रथितं **"पत्युर्नो यज्ञसंयोगे"** यज्ञीयानुष्ठाने तस्या आवश्यकत्वात्। अस्या सम्मानमेव सूत्रेणानेन विज्ञाप्यते। गृहस्थधर्मस्य विकत्थने **"धन्यो गृहस्थाश्रमः"** इत्यभीक्ष्णशः शास्त्रेषूदीरितन्तदवध्यातव्यमवधायेह निदिध्यासितव्यम्।

श्यामाश्यामाभिधानवतां भगवतामभिगीतमधिगीतमिह सन्दर्श्य अस्या महान्तं महिमानं श्रीमतां पुरस्तादभिगायामि –

**"कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा।"** गीता – १०–३४

परमात्मनोक्तं नारीणामहं कीर्तिः श्रीः वाक् स्मृतिः मेधा धृतिः क्षमा चास्मि। अस्मदीयधर्माभिलक्षणं वदतां वचनमनुस्मर्तव्यन्तत्रासामुल्लेख स्फुट एव द्रष्टुं शक्यो यथा –

**"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**

**धीर्विद्या सत्यमक्रोधः दशकं धर्मलक्षणम् ॥"**

इह धृतिस्साक्षाद्भगवतामेव स्वरूपभूतोक्ता। दुर्गासप्तशत्यां तु मातुः भगवत्याः स्वरूपमभिवर्णयन्ती पञ्चमाध्याये ऋषिणोक्ता वागेवं निगदति यथा –

**या देवी सर्वभूतेषु धृतिरूपेण संस्थिता।**

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमोनमः। एवमेव पद्यान्तरेषु स्मृतिः मेधा कीर्तिः वाक् इत्याख्यानां देवीनां दर्शनम्। कश्चिदपि नरः मेधां स्मृतिं धृतिं कीर्तिं वाचमन्तरा नरोऽभिधातुं शिवश्शवस्तथा नारीमन्तरामेवं विद्यान्नरोऽप्यनर एव। तुलसीदासो हि श्रद्धाख्यां तामेवं श्लाघते पश्यत यथा –

**भवानीशंकरौ वन्दे श्रद्धाविश्वासरूपिणौ।**

**याभ्यां विना न पश्यन्ति सिद्धाः स्वान्तस्थमीश्वरम् ॥**

परमात्मा कृष्णोऽप्यर्जुनायोपदिशन् तस्या ज्ञानोदये हेतुत्वं निगदति–

**"श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।**

**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥"**

कालिदासस्तु कविमणिरिह स्वाभिमतमभिमृशन्नाह यथा–

**वागर्थाविव सम्पृक्तो वागर्थप्रतिपत्तये।**

**जगतः पितरौ वन्दे पार्वतीपरमैश्वरौ॥**

वागिह पार्वती, अर्थश्च परमेश्वरस्तयोस्तादात्म्यं प्रदर्श्य पितुर्वन्दनं समुक्तमनयोर्भैन्या भावः समभिहितः। तुलसीकृतरामयणेऽयमेव भावो मीमांसित तद्यथा –

**गिरा अरथ जलवीचि सम कहियत भिन्न न भिन्न।**

**वन्दउँ सीतारामपद जिनहिं परम प्रिय खिन्न॥**

गीरर्थश्च जलतरंगवदेकमेव तत्त्वम्। अज्ञानभृतामेवानयोरनेकत्वम्। भवभूतिरिहाह करुणरसप्रसंगे एकोऽपि करुणः भिन्न भिन्नः प्रतिभासते यथा –

**एको रसः करुण एव निमित्तभेदा,**

**द्भिन्न पृथक् पृथगिवाश्रयते विवर्तान्।**

**आवर्तबुद्बुदतरंगमयान् विकारा,**

**नम्भो यथा सलिलमेव हि तत्समसतम् ॥**

भगवान् वेदो हि सर्वैरभ्युदयाय प्रयतितव्यमित्युक्त्वैच्चौः आदर्शमादिशति यथा –

**"वयं राष्ट्रे जागृयाम पुरोहिताः।"** यजु० ६–२३

श्रुतिरिह वयमिति सम्प्रोच्य सर्वेषामुल्लेखो दर्शितः। वयमित्यनेन नारीणां नृणाम्वा ग्रहणमंगीकर्त्तव्यम्। नेह नरैरूत्थानाय प्रयतितव्यमिति वाच्यमपितु नारीभिरपि स्वाभ्युदयाय कृतयत्नाभिर्भवितव्यमिति वाच्यमेव। अतो न मन्त्राणामेकपक्ष एव म्रष्टव्योऽपितु अपरपक्षोऽपि समाम्रातव्यः। एवमेवापरत्रापि विमर्शो विधातव्यो यथा –

**"उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।"**

इह त्रितयमपि क्रियापदं मध्यमपुरुषबहुवचनान्तं प्रेरणात्मकम्। अत्रापि पूर्ववत्सर्वेषामुत्थानाय नोदनमवध्यातव्यम्। बहुवचने पुरुषाणां स्त्रीणाञ्चाधिगमोऽधिगन्तव्यः। एवं वक्तुं शक्यं यत् वेदेषु सर्वत्र समानाधिकारो नारीणां नराणाञ्च।

अबलेति शब्देन शब्दिता पूजितव्या महिला कथं बलहीनांगीक्रियते नञः षडर्थकत्वात्। न केवलं नञोऽर्थोऽभावः। बलयतीति बलः बलिनमर्थमाह तस्य सादृश्यं भजमानस्य नञो ग्रहणात्स्वत एवावगम्येत यदबला बलिनमर्थं भजन्तं नञं गृहीत्वाऽबला बलसमानेति सामान्यार्थोऽधिग्रहीतव्य इति। अबला बलबतो समाना बला एव **"अर्श आदिभ्योऽच्"** इत्येन अचा सिद्धाऽबला तदर्थं ब्रूबतेह स्मर्तव्यम्। कलियुगं वर्णयता दासेन तुलस्या नारीविषये यदुदीरितन्तदिह स्थाप्यते –

**नारी विवश नर सकलगोसाई,**

**नाचहिं नर मर्कट की नाई।**

केनचिदुक्ता नारीनिन्देहेति परं विमृष्टे सति विज्ञायेत यदिहामुष्या नार्याः वशे समस्ता नराश्चेन्नार्य्याः श्लाघनमेव। नरः कस्याः वश्यः नार्याः। तद्वश्यो मर्कट इव नृत्यति नरः। अयं नारीप्रशंसा कथनमभिम्रष्टव्यम्। अपरत्र शंकरमुखेनोमा प्रोच्यते, पश्यत –

**ईश्वर अंश जीव अविनाशी चेतन अमल सहज सुखराशी।**

**सो माया वस भयऊ गोसाई बन्ध्यो कीट मर्कट की नाई॥**

अत्रेश्वरांशो जीवोऽपि मायया बन्धितो मर्कट इवाचरति। अत्रापि नार्य्याः वारिवस्यैव दरीदृश्यते। मायापि नारी एव यया सम्मोहितः नरः तामनुचरन्तस्या अनुरूपं जीवतीति नारीणां प्रशंसैव। माता–भगिनी–पत्नी–कामिनीत्यादिभिः नामभि समाकार्यते। मातृरूपा नारी पित्रपेक्षया सहस्रगुणिता पूज्येति यथा –

**उपाध्यायाद्दशाचार्य आचार्य्याणं शतं पिता।**

**सहस्रं तु पितॄन् माता गौरवेनातिरिच्यते॥**

एवं वक्तुं शक्यं यन्नारी अस्माकं पूज्यतमा, यां विना जगज्जीर्णारण्यवत् भवति। चेतना शक्तिः नारी, यया शरीरे चौतन्यं भासते। विष्णुचेतना लक्ष्मी, शंकराहलादिका पार्वती, तथा नरचेतना नारीति समाम्नाय।

पुनः तस्याः प्रशंसावागिह शख्रोकमुखेन प्रोद्यते –

**यस्या प्रभावमतुलं भगवाननन्तो।**

**ब्रह्मा हरश्च नहि वक्तुमलं बलं स्यात्॥**

**कपाली भूतेशो भजति जशदीशैकपदवीम्।**

**भवानी त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥**

- **सं जानानाः संमन सः सयोनवः। अथर्व. 7/20/1**

अथर्ववेदीयसूक्तमिदं सर्वेषां सामञ्जस्यं भाषमानमिहोपन्यस्तम्, अमुष्यान्तर्हिताशयमभिभाष्यामर्शञ्चेह प्रदाय किञ्चिन्मीमांस्यमानेन मयका मृगयितोच्यते यत्समैः सार्धं स्थातव्यं समनोभिरहर्दिशन्नरैरधिष्ठेयं कुहचनापि केनापि न विद्विष्टव्यमित्युपदेष्टव्यमिहोक्तम्। भावमिदमेवासौ मन्त्रश्चोच्चं निगदन्नाह –

**"सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै,**

**तेजस्विनावधीतमस्तु मा विद्विषावहै॥"**

अवनाशनविक्रमादीनां सर्वत्र सर्वदा साहचर्यमाचरद्भिरस्माभिरधिष्ठेयमित्युपदिशद्वाक्। सौमनस्याय यथा कल्प्येत तथा स्थातव्यमित्युपदेष्टव्यन्तेन सौविध्यात्सर्वं साध्य जातं संसिध्येत्। यथा साकारोपासनायां कृच्छ्राभावो न तथा निराकारोपासना गम्यगम्या। अतः गीतावचनमस्मिन्नाह –

**देवान् भावयतानेन ते देवा भावयन्तु वः।**

**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥** गीता

आज्यैर्हविर्भिः प्रसन्नात्मनः देवा पर्जन्यसूदनेन आचराचरजीवं सन्तर्पयन्तः दृश्यन्ते। अनेन जीवानां देवानाञ्च परस्परं साहाय्यमभिलक्ष्यते। पर्जन्योऽस्माकं जीवनन्तत्कथमाविर्भवेदित्युक्ते भगवती श्रुतिराह हविर्भिरिति। हविरेव देवानामशनम्। मुखपूरितैः देवैरनिशमुपक्रियते। उपकारात्तेषामूर्व्यां जीवनमिति

दर्शनशास्त्रम्। अत्रोदाहृतं प्रस्तुत्य किञ्चिदुच्यते यथा विद्युत्स्तम्भः परस्परमनेकेषामराणां सम्बन्धाच्चिरं तिष्ठन् अरब्रातमुपहति तथैवास्माकं जीवनमन्योन्याश्रितमिति सर्वथोचितमेवात ऋग्वेदश्चाह –

**"संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**

**देवा भागं यथा पूर्वे संजानाना उपासते॥"**

परस्पराकूताभाववद्भिर्देवैरसुरैर्भृशमाहन्यमानैः पराभवोऽधिगतः। परं पुनर्विचारिते सौमनस्यं प्राप्नुवद्भिः पुनस्तै विजयोऽधिगतः। अत आह संगच्छध्वं, संवदध्वमिति। अस्माकं मनांसिः सुचरितानि स्युरिति सन्देशः। पुनः पुनराकुञ्चितेषु स्यूतेषु समूहीकृता रज्जुः मातंगमप्यतिबलबन्तं बध्नाति तथा वयमपि सम्मनसः कृच्छ्रमपि साध्यं सुसाधं प्रतिपादयितुमर्हा इति पुनरत्र प्रमाणं भजमानो वामदेवश्चाह –

**समानी वः आकूतिः समाना हृदयानि वः।**

**समानमस्तु वो मनः यथा वः सुसहासति॥**

आकृतिः संकेतः, हृदयानि मनसाश्रयाः, मनः सर्वविकारात्मा अन्तःकरणेन्द्रियभूतः सुखदुःखसाधनः, समानमस्तु भिन्नत्वेऽपि ऐक्यं राजताम्। साफल्यसौगन्ध्यास्वादनायैकत्वमुक्तानामन्योन्यमावश्यकमिति वेदवचः।

हितोपदेशकारैस्तु सोदाहृतं यदुक्तन्तदाशयमिह प्रस्तुवन्निहाह –

**"संहतिः कार्यसाधिका।" "संहतिः श्रेयसी पुंसाम्"**

तुषयुक्तं तण्डुलं पुनरंकुरायते यदि तण्डुलात्तुषो भिद्यते तदा मृदम्बुसाहचर्येऽपि न तत्पुनरारोहतीति महदुदाहरणम्। अस्मादपि शिक्षणीयं यत्सदा एकत्वं भजनीयम्। भागवतेऽपि व्यासेनेहोक्तन्तदिदं यथा –

**"संघे शक्तिः कलौ युगे।"**

भिन्नभिन्नत्वे सति द्रोहादीनामुत्फफललत्वम्, अतथात्वे समत्वं, समत्वे सति योगत्वं, योगत्वे सति कौशलत्वं कौशलत्वे साध्यानां व्यवस्थितत्वन्तत्रैव शान्तित्वम्। शान्तिरेव प्रसादमधिगच्छन्ती सर्वान् प्रसादयति। प्रसादे दुःखानामैकान्तिकनिवृत्तिः। तथात्वे एकाकारवृत्तित्वन्तदेवेश्वरानुग्रहः, स एवानुप्रयोजनमिति सुभाषिताशयः।

➢ **"माता भूमिः पुत्रोऽहं पृथिव्याः" अथर्व०**

चराचरभूतानां प्राणाप्राणसंभृतां माता भूमिरेवेति वेदोक्तिमनुसरतां विपश्चितामृषीनां बाहुल्यं लोकं लोकमिदमवभाषितुं शक्यं यदेषा वसुन्धराऽस्माकं समेषां सर्वस्वभूता जननी पार्थिवाखिलवस्तुजातैरस्मान् सर्वान् बर्भरीति। अतः आथर्वणैः सत्यमुक्तं **"माताभूमिः"** इति। **"कल्पलता"** यथा कल्पनायां कृतायां सर्वदा भवित्री सर्वं प्रदत्ते तथैवासौ भूमिः। यत्किञ्चिद्दृश्यमानं प्रमेयं तत्सर्वमेवोर्व्याः समुद्भूतमेव। जीवनार्हं वस्तु पार्थिवमेव तस्या विकारित्वात्। प्रसंगेऽत्रोदाहरामि सूक्तम् –

**''नानाफलैः फलति कल्पलतेव भूमिः।''** हितोपदेशः

भगवद्गीता प्रोच्चं निगदन्तीमां प्रकृतेरष्ठविधाया आद्यां प्रकृतिं चाह यथा –

**भूमिरापोनलो वायुः खं मनो बुद्धिरेव च।**

**अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा॥**

या चाद्या सा श्लाघनीया। सर्वासु प्रकृतिषु अस्या महत्त्वं पृथगिवावभासते। यां विनाऽन्यासां प्रयोजनमपार्थत्वं स्वतः सिद्धम्। प्रत्येकं पृथक् पृथगेव महत्त्वं यद्विनाऽस्तित्वं वसूनामसम्भवन्तत्रापि आद्या प्रकृतिः सर्वत्रोता प्रोता विभाति। कालिदासेन स्वाभिज्ञानशाकुन्तलाद्यपद्येऽष्टानां प्रकृतीनामीश्वरप्रत्यक्षविग्रहाणां चर्चां विदधता यदुक्तन्तदुदाहृत्य किञ्चिदुच्यते।

तन्मतानुसारमाद्या प्रकृतिर्जलमयी ततोऽन्याप्रकृतिरुद्भूता। पुराणसम्मतं मतमेतत्। उपनिषद्यपि जलमयी प्रकृतिः पूर्वतमैवेति निगदितन्तस्मादन्यासामुद्भव इति उल्लिखितम्। भवत्वाद्या जलमयी प्रथमा प्रकृतिः परन्ततोऽपि विशिष्टोर्वी एव। उभयथा जीवनं विशिनष्टि कोविदः। प्रकृतिरन्योन्याश्रिता पञ्चीकृता दृश्यते। सर्वासां प्रयोजनमीश्वरनिर्मितिसंचालनमेव। अतथात्वे सर्वमेव व्यर्थम्। मृग्यमेतदवश्यन्तथापि पृथिव्याः सर्वबीजप्रकृतित्वं सिद्धमेव तदेव ब्रुवन्नाह काल्यादासः –

**''यामाहुः सर्वबीजप्रकृतिरिति।''** अभिज्ञानशाकुन्तलम् –

वात्सल्य–क्षमा–तितिक्षा–करुणा–ममतादिगुणनिवहवत्याः मातुस्साम्यं विधातुन्नार्हा कापि क्वापि, तादृश्या अमुष्या एकैकगुणमभिधातुं किञ्चित्यत्यते। वत्सं लातीति वत्सलस्तस्य भावः वात्सल्यमियं सर्वान् मातृवत् तद्वितन्वन्ती न स्वयं वितुदति **''क्षमूष् सहने''** इत्यस्माद्धातोः **''पचाद्यच्''** इति अचि, षित्वात् **''षिद्भिदादिभ्योऽङ्''** इति सूत्रेण स्त्रीत्वाधिकारेऽङ् तस्मात् **''अजाद्यतष्टाप्''** इति टापि सति **''क्षमे''**ति व्युत्पन्नश्शब्दः मातरिक्षमावदेषा सर्वदा सर्वान् क्षमते। कश्चित्खनति एनां, कश्चित् निष्ठीवति, कश्चिद् हदते, कश्चिन्मेहति तथापि नासौ खिन्दतीति अस्या क्षमात्वं स्वाभावसिद्धम्। कविनात्र केनचित्साधूक्तं यथा –

**''क्षमा बडन को चाहिए छोटन को अपराध।''**

त्यक्तुमिच्छेति विग्रह्य **''धातोः कर्मणः समानकर्तृकादिच्छायांवे''**ति सूत्रेण सनि **''अप्रत्ययात्''** इति अकारे टापि सति तितिक्षा भवति या सर्वस्वं त्यजति नात्मनि किंचित् निगूहति सैषा तितिक्षागुणवती मातृवत् भूमिः। **''डुकृञ्''** करणे इत्यस्मात् उनन् प्रत्यये सति **''सार्वधातुकार्धधातुकयो''**रिति गुणे करुणेति जायते। कृतिशीलासौ सर्वदा किमपि किमपि कुरुत एव। गीतोक्तवचोऽत्र निर्दशयामि –

**''नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।''**

कृतिमन्तरेणान्नफलवस्त्रादीनां कथमुद्भवस्तस्मात्सिद्धामुष्याः कृतित्वमपि। बीजादीनां वृक्षत्वे कृतित्वं कारणन्तत्रापि फलादीनामुद्भवे कर्मत्वमतः करुणात्वममुष्यां सिद्धमेवास्तु। अस्या नामान्तरं वसुधा वसुन्धरा

विश्वम्भरेति विश्रुतं तत्रापि कार्यकारणयोरेव प्रभावः। वसुधनं धत्ते सा वसुधावसूपपदे **"डु धाञ् धारणपोषणयोः"** इत्यस्मात् स्त्रीत्वाधिकार प्रोक्तेन **"आतश्चोपसर्गे"** इत्यनेन सूत्रेण अङि ततः टापि सति वसुधा। वसु धरतीति **"धृञ् धारणे"** इत्यस्मादचि टापि सति वसुन्धरा, विश्वं बिभर्ति **"भृञ् भरणे"** इत्यस्मादचि टापि विश्वम्भरेति अन्वर्थसंज्ञा अस्याः। विश्वं बिभर्ति वसु धत्ते इत्यत्र न केषामपि विप्रतिपत्तिः। मातापि जन्मसकाशमेव दुग्धरूपं धनं धत्ते स्वस्तने बालं तद्धयति अतः वसुधा वसुन्धरा। बालं दुग्धेन बिभर्ति अतः विश्वम्भरा अतो मातुः वसुधात्वं विश्वम्भरात्वं अन्वेत्येव। तथात्वेन मातृवत् भूमेः कृतित्वात् **"माता भूमिरिति संगतमेव।"**

साम्प्रतं पुत्रोऽहं पृथिव्यां इति विमृश्योच्यते यः स्वसुचरितैः मातरं पितरञ्च प्रसादयति स पुत्र इति संज्ञा। सुभाषितानुकूलं विग्टह्येह विमृष्टमेतेन मन्त्रोक्तपुत्रलक्ष्मत्वन्न सर्वथा संगच्छतेऽतो व्युत्पत्यन्तरं विभाव्योद्यते किंचित्। सर्वं विश्वं द्विधा विभक्तं जंगमं स्थास्नु इति यद्धि स्थास्नु तत्स्थूलं, यज्जंगमन्तत्सूक्ष्मम्। उभयमेव पृथिव्याः उद्भवम्। मातुः कुक्षितः निस्सृतं चरं जगत् यथा तथैव पृथिवीगर्भतः सर्वं निस्सरत्येव। स्थूलशरीरमस्माकं पार्थिवं अत उभयथा विचारिते भूमेः मातृत्वं सिद्धं तदुद्भवात् अस्माकं पुत्रत्वं भूमेरेव सिद्धमतः **"पुत्रोऽहं पृथिव्याः"** इति सप्तशतीकारस्तु मातृपुत्रयोरन्यतरस्य गुणं वैशिष्ट्यञ्च वर्णयमाणः प्राह –

**"कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।"**

परमद्यत्वे वात्सल्यं विस्मरन्तीभिमार्तृभिः पुत्र्यः वीथीषु गुल्मेषु कुञ्जेषु राजपथेषु क्षिप्यन्ते, ताः प्रतिवासरं समाचारपत्रेषु मुद्राप्यन्तेऽस्माभिरनिशं पापठ्यन्ते दरीदृश्यन्ते च। किमयं कलेः प्रभाव आहोस्वित्किमप्यन्यदिति समाजविद्भरस्माभिरपरिहार्य्यत्वेन मृगनीयम्। नो चेदियमुक्तिरूर्ध्वतना वितथायिता सती अनादरणीया स्यात्। अथर्ववेदस्त्वन्यत्र भूमेः मातृत्वं समुक्तं तदनुदाहरन्मन्त्रोऽत्र निर्दृश्यते –

- **"द्यौष्ट्वा पिता पृथिवी माता।"** 2/28/8

अद्यतनीयानां मातॄणां वात्सल्यं कमाश्रितमिति सम्यक् अन्वेष्टव्यम्। क्वचित्तु जीर्णां हीनां दीनां सन्ततिं अभिलक्ष्यापि न कारुण्यमुपैति। सर्वमन्नमात्मनि निदधानानां मृत्यवे समुज्झतीति दृग्गोचरीभवति। मन्येऽत्र पुत्रोऽस्तु कुपुत्रः माता तु तथा न भवेत्। अभयत्र परिदेवनां विहाय समाधानं मृग्यमिति मामकीनं मतम्।

- **जीवास्थ जीव्यासं सर्वमायुर्जीव्यासम्।** 19/69/4/19/70/1

सुभाषितेयमाथर्वणी। इह क्रियावद्भिः सह संगादायुष्यं दीर्घायितं कल्पितम्। सर्वमायुर्जीव्यासमित्युक्तेऽकालमृत्योरपाकरणं निर्दिष्टम्। मन्त्रेऽस्मिन्नायुष्यानां सम्पूर्णत्वं विमृश्य कथं तत्सर्वमायुष्यं जीवेमेति प्रोच्चं समुक्तम्। जीव्यासमिति आशिषि लकारस्तेनाशीः कामेनायं मन्त्रः समुद्घोष्यः। जीवनाधारकतत्त्वविदामयमेव प्रवादोदाहारशौचयमंगीकर्त्तव्यं यथा –

**"आहार शुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः।**

**स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः ॥''**

आहारशुचितया मनसां विकारापकारस्तेन स्मृतीनां ध्रुवत्वन्तेन च अज्ञानादिग्रन्थीनां समस्तानां विशेषेण मोक्षः। अज्ञानादिजन्यापकृतिकर्तृतत्त्वे परिगणितानां कामक्रोधादिदोषाणां हानन्तेनायुषां दीर्घदर्शनत्वं सुलभम्। दीर्घायुष्कारकं तत्त्वान्तरमुच्यते –

**''युक्ताहार विहारस्य युक्त चेष्टस्य कर्मसु।**

**युक्तस्वप्रावबोधस्य योगो भवति दुःखहा ॥''**

कारिकेयं वासुदेवोक्ता किंचिद्विमृश्यते। युक्तमत्रोचितमुक्तं यद्वा धर्मोक्तनियमो ग्रहीतव्यः। तद्वतामाहारविहारचेष्टास्वप्रजागृतिमतां योगः स दुःखं हन्ति व्यपगमयति अतः दुःखहा। दुःखहानत्वेनैव समस्तम् आयुः जीव्यत इति।

ततोऽपि वेद्यान्तरमिह व्यादाय समुदीर्यते यत् –

''हितभुक्, मितभुक्, ऋतभक्'' – हितं यद् विदध्यात्तदेव भोक्तव्यम्। अन्ने जीर्णे हितं कुर्यादतो हितमन्नमशितव्यमिति बुद्धया तदेवान्नमत्तव्यम्। मितं भुनक्ति स मितभुक्। मितं न्यूनं परिच्छिन्नं वा यावती क्षुत् ततोऽपि किञ्चित् न्यूनमेवेति मितेन स्वीकार्यम्। मितभोजी दीर्घं जीवतीति लोकेषु स्थविरैरनिशं भाष्यते। ऋते ऋते यदन्नं फलं वोद् भवति तत्तदेवाशितव्यम्। ऋतौ प्रादुर्भूतेन अन्नेन शाकेन फलेन वा शरीरावश्यकत्तत्वोपलब्धिस्तेन दीर्घायुष्यम्। केनचित्सुभाषितकारेणान्नमपि सूक्तं गणितं तद्यथा – **''पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।''** अन्नं रत्नं, तत्कथमिति पृष्टे चाह यथा रत्नं तमोऽपहरति। तथान्नमपि कलेवरं पुष्णत् मनोमलं व्यपगमयति। **''जलमन्नं सुभाषितम्''** एतत्त्रयं रत्नोपममपि त्वुचितन्तु अन्नोपमं रत्नमिति प्रतीपमिह वक्तव्यम्। विनान्नन्न जीवनं तदन्तरेण सर्वमसत्यमेव। यावज्जीवन्तावदन्नं शरीरस्यान्नमयत्वादुद्वान्नाणुत्वमेव मनसो निर्माणत्वात् अन्नं शरीरं मनश्च निर्माय भौतिकमाध्यात्मिकञ्चोन्नयनं पुष्णाति तेन दीर्घायुष्यं स्वतः प्रमाणितम्। भगवतोक्तमधिगीतं यत्कर्मणा शरीरयात्रा प्रवर्तते। अकर्मणा शारीरं मलमुत्पद्यते तेनापि आयुषो हानि यथा –

**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।**

**शरीरयात्रापि च ते न प्रसिध्येदकर्मणः॥**

शारीरी यात्रा द्विधा स्वस्थाऽस्वस्था च। अन्नोत्पादनाय कर्म, कर्मणा शरीरस्वेदोत्पत्तिस्तेन शारीरी स्वस्थता। कर्मणि व्यापृतत्वात् विषयेष्वनासक्तत्वान्मनसः स्वस्थता तेनाप्यायुष्यदीर्घत्वं प्रसिद्धमेव। विषयमिममुपनिषद्वाक्यं प्रमाणयदाह –

**''कुर्वन्नेवेह कर्माणि निजीविषेच्छतं समाः।**

**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरः॥''**

कर्मलिप्सा एव कर्मविचिकित्सामुत्पादयति। कर्मविचिकित्सया विनाशस्तद्यथा – **''संशयात्मा विनश्यति।''**

कर्मविचिकित्सा महतामपि मुनीनां स्यादिति वासुदेवोक्तं पद्यं यथा –

**कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः।**

**अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः॥**

**''कर्म की गति न्यारी''**ति हिन्द्यामपि उक्तिरियं बहुधा जनैर्गीयते –

**''अन्नेन क्षणिका तृप्तिर्यावज्जीवं च विद्यया।''**

सुभाषितमिदमन्नस्य क्षणिकतृप्तित्वन्दर्शितन्तन्नान्नमयस्य शरीरत्वात्। यावज्जीवन्तावदन्नं विग्रहं पुष्णाति। शरीरस्य चाधारत्वादात्मन इन्द्रियाणाञ्चेति। **''अन्नं वै ब्रह्म''** इत्युपनिषद्वाक्यगदितत्वात्स्थूलशरीरस्यापि ब्रह्मत्वं सिद्धम्। **''सर्वं खल्विदं ब्रह्म''** इति वाक्यस्यप्रमाणपुष्टत्वादपि तदेव ज्ञातव्यम्। दीर्घायुष्यस्य तु शरीरसम्बन्धत्वादेव। आत्मनोऽजरामरात्वात्तस्य दीर्घायुषोऽसम्बन्धस्य सत्वात्। शरीरात्मनः सम्बन्ध एव जीवनम्, तयोः पार्थक्यमेव मृत्युः। जरात्वमृत्युत्वधर्मवतो शरीरस्यैव शतायुस्त्वं मन्त्रजुषामृषीणां प्रोक्तत्वात्। ऋषीणाञ्चामिथ्याभाषित्वात् **''न मिथ्या ऋषिभाषितमिति''** प्रमाणसिद्धत्वादिदं सिद्धं यत् दीर्घायुष्यं समस्तजीवसुखाय मौलिकं तत्त्वन्तत्र यतनीयम्। आथर्वणी विद्याप्यत्र प्रमान्ती दृग्गोचरीभवति यथा –

**''आयुः प्राणं प्रजां पशुं कीर्तिं द्रविणं ब्रह्मवर्चसम्।**

**मह्यं दत्त्वा व्रजत ब्रह्मलोकम्॥''** अथर्ववेदः १९–७१–७१

सत्संगमादपि सर्वमायुः प्राप्तुं शक्यं स्यादत्राह सूक्तिः –

**''सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः।**

**श्रद्धधानोऽनसूयश्च शतवर्षाणि जीवति॥''**

- **अनुव्रतः पितुः पुत्रो मात्रा भवतु समनाः। जाया पत्ये मधुमतीं वाचां वदतु शान्तिवाम्॥ अथर्व० – 3/30/2**

भगवता वेदेन पुत्रं सम्बोध्य मन्त्रोऽयं समुपदर्शितः, एनं सर्वेऽवश्यं पश्येयुः। अद्यतनस्थितावयं मन्त्रस्सर्वथानपार्थः। अत्र जायां सम्बोध्यापि भगवान् वेदः समुपदिशति उभयत्र कथं व्यवहार इति दृष्टिः।

पुत्रः मातरं पितरं, जाया च पतिं कथं व्यवहरेदिति दर्शनमद्भुतमिदं हि आत्मसात्कुर्यात्। समस्याद्येयमेव सर्वत्र दरीदृश्यते। अस्या निवृत्तिः वेदे सम्यक्प्रतिपादिता। तामात्मनि कृत्वा समस्यामद्यतनीं समादध्यात्। विव्रियतेऽधुना मन्त्रः पुत्रः पितुरनुव्रतः स्यादस्याशयः **"पुत्रः पितुरनुगामी भवेत्।"** मात्रा भवतु सम्मनाः, अस्यार्थः पुत्रेण मात्रा सम्मनसा भवितव्यम्। सम्मनाः अस्यानेकविधोऽर्थः समानं मनो यस्य, सम्यक् मनः यस्य, सुष्ठु मनः यस्य, समीचीनं मनः यस्यः समं मनो यस्येत्यनेकधा व्युत्पादयितुं शक्योऽयं शब्दः, यथामति चास्यार्थो ग्रहीतव्यः। षट्सु सुखेषु "वश्यः पुत्रः" एकः सुखः। पितुर्वश्यः लोकः स्यादिति ऋष्यभिप्रायः। भर्तृहरिराह यथा –

**"यः प्रीणयेत्स्वचरितैः पितरं स पुत्रः॥"**

पद्यान्तरं विव्यारव्यातुमाचष्टे **"जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्"** अत्र भार्यायै पत्या सत्रा कथं व्यवहरणीयमिति विवृण्वन्नृषिराह यत् शान्तिमयीं मधुरां सुनृतां वाणीं पत्या साकमाचक्षीत। अत्रापि प्रसंगे वक्तव्यन्न विष्मर्तुं शक्यं यत् नीतौ तु साधूक्तं **"प्रिया च भार्या प्रियवादिनी च"** भार्यया प्रियया प्रियवादिन्या च सदा स्थातव्यम्। व्याकरणोदाहरणे **"गेहे कः"** इत्यत्र भट्टोजिदीक्षितेनोक्तं **"गृहा दारा"** केनचित् सुभाषितकारेणाप्येतत्समर्थितं **"गृहिणी गृहमुच्यते"** तु एवमपि साधूक्तं यथा –

**यस्य नास्ति गृहे माता भार्या च प्रियवादिनी।**

**अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥**

अस्याशयो यत्पुत्रेण मात्रा पित्रा सत्रा, भार्यया च पत्या साकं कथमाचरितव्यमिति प्रोच्चविचारोऽयं प्रस्तुतः। अद्य प्रतिगृहमेषा समस्या सुरसेव मुखं व्यादाय समाजम् अभ्यवहर्तुमीहते। अस्याः अद्यतनीनायाः बहिः कथं गन्तव्यमिति ऋषिः साधुतया ऐनां समास्यां समादधौ, यदि वयमिह ऋष्युक्तं मन्त्राशयं मनसि निधाय चेतसि विमृश्य च तथाऽऽचरेम तर्हि निश्चप्रचं समाजः कल्याणाय कल्पेत। चतुष्पदात्मको लघुरसौ मन्त्रः आकाशवद् विश्वव्यापिनीं समस्यां समाधातुमुपतिष्ठते भवतः सकाशम्। सर्वैरयं यथर्षिभावं ग्राहयद्भिः स्थातव्यम्। वेदोऽस्माकं पन्थानं निर्दिशति। यदि वयमेवान्धाः तर्हि स किं कुर्यादाशासे मन्त्रश्चरितार्थः स्यात्।

- **मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा। सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया॥ अथर्व० – 3/30/3**

**विमर्शः** – अथर्ववेदीयं सूक्तं विश्वं सम्बोधयदिदमुच्चैः प्राह यत् भातृभिरात्मभ्रातृभिर्व्यवहारः, स्वसृभिरात्मस्वसृभिश्च व्यवहारः कीदृशो विधातव्यः। अस्य सूक्तस्य दर्शनात्पूर्वं निश्चितमेव ऋषिणाथर्वेणानुभूतं यदधिसदनं द्वेषोऽभिजायते भ्रातृभिः भ्रातृभिः, स्वसृभिः स्वसृभिः सहेति। व्यवहारमभिदृश्यैव मन्त्रद्रष्टा ऋषिरेनं मन्त्रं ददर्श। मन्त्रार्थस्तावत्प्रदर्श्यते मेति निषेधार्थीयोऽव्ययः। भ्रातेति प्रथमान्तं पदम्। भ्रातरमिति द्वितीयान्तमुणादिनिष्पन्नं तृजन्तं पदमत्र द्विक्षन्निति शत्रन्तं" द्विष् अप्रीतावित्यर्थको धातुः। पुनर्मेति निषेधार्थकः माङ् एव। स्वसेति भगिन्यर्थकं द्वितीयान्तं पदम्। उतेति आहोस्विदर्थको निपातः पुनस्स्वसेति प्रथमान्तीयम्।

सम्यञ्चेति सहार्थकं समीचीनार्थकमिति यथाशयं ग्रहीतव्यम्। सव्रता इति समानो व्रतो व्यवहार आचरणं वेति यस्येति बहुव्रीहि–विग्रहोऽन्यार्थकः। भूत्वेति क्त्वान्तं, वाचमिति वचोऽर्थकं द्वितीयान्तम्। वदतेति मध्यमपदबहुवचनान्तं लोटः पदम्। भद्रयेति मंगलार्थकं तृतीयान्तम्। भ्राता भ्रातरं बिभ्रियात्, स्वसा स्वसारं च बिभ्रियात्। द्विक्षन्नित्यनेनदं सूक्तं यत्कदापि तैः ताभिश्च सह न द्वेष्टव्यम्। द्वेष्टव्यमित्यस्याभिप्रायो यदप्रीतिर्न विधेया। आचरणे सर्वदा प्रीत्या भवितव्यम्। यत्र प्रीतिस्तत्रैव परमात्मनोऽवतारः, अतः साधूक्तं तुलसीदासेन स्वग्रन्थे –

**"जहाँ सुमति तहाँ सम्पति नाना जहाँ कुमति तहाँ विपति निधाना॥"**

**"हरि व्यापक सर्वत्र समाना प्रेमसे प्रगट होई मैं जाना।**

**अगजगमय सब रहित विरागी प्रेम से प्रभु प्रगटे जिमि आगी॥"**

प्रेम्णा हरिरपि निजलोकं विहाय भक्तहृदयेषु विराजमानस्तं सुपथाय निर्दिशति –

**सकलभुवनमध्ये निर्धनास्तेऽपि धन्या निवसति हृदि येषां श्रीहरेर्भक्तिरेका।**

**हरिरपि निजलोकं सर्वथातो विहाय प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धः॥**

प्रेम्णो हि अपरः पर्यायः भक्तिस्तया हरिर्यदि वश्यस्तर्हि मानुषाणां का कथा। अतः उपरितनवेदवाक्यमस्मभ्यं प्रीतिमेव शिक्षयति व्यवहाराय तथादिश्योपदिशति च। इह तु नान्येषां द्वेषाभावाय ईरयति अपितु भ्रातरं स्वसारञ्च प्रीत्या भ्रात्रा स्वस्राहरहः स्थातव्यमिति निर्वक्ति मन्त्रः। इह असारे संसारे सर्वं पुत्रं मित्रं कलत्रं सदनादिकमुपलब्धुं शक्यं परं न खलु सोदर्यभ्राता सोदर्यस्वसा संलब्धुमिति पितामहेन तुलसीदासेन स्वकीयामरकृति रामायणे निगदितं तदत्र निर्दिश्यते –

**सुत वित नारी भवन परिवारा होह जाहि जग वारहि वारा।**

**अस विचार जग जागहू ताता मिलहि न जगत सहोदर भ्राता॥**

लंकाकाण्डे मेघनादेन प्रहितेन बाणेनाहतस्य शेषावतारस्य लक्ष्मणस्य धराशयितस्यावस्थां दर्शं दर्शं सकरुणं प्रभूरामो जगाद भो लक्ष्मण! संसारे सर्वस्वं लब्धुं शक्यम्परन्नहि सहोदरभ्रातारमाप्तुं शक्तव्यमिति विभाव्य शीघ्रं जागृहि जागृहि। वाक्यमिदमुपर्युक्तं रामस्यानन्तगुणस्य कर्तुमकर्तुमन्यथाकर्तुं शक्यस्य वर्वति। यथाप्तवाक्यमस्मानुपदिशति तथैव भगवान् श्रीरामोऽपि जगते साधूक्तं दत्ते। आभ्यां द्वाभ्यां वाक्याभ्यां अस्माभिरनिशमवगन्तव्यं यन्न कदापि भ्रात्रा स्वस्रा द्वेष्टव्यम्। वाक्याभ्यामुपलक्षिताभ्यामिदमवबोद्धव्यं यन्निरर्थकं न कैरपि सार्धम् अप्रीतिमद्भिर्व्यवर्हतव्यमिति अमुष्य विमर्शस्य सन्देशः। अथ बाल्ये यो हि भ्राता भ्रातरं प्ररक्षितुमात्मप्राणमुत्सृजति सैव युवावस्थायां वृद्धावस्थायाम्वा तमेव प्राणैरपि ग्लहैरभिचारयितुमीहते।

व्यवहार विपर्ययमभिवीक्ष्य स्वतः एवेदं विबोद्धुं शक्तव्यं यद्यथा बाल्ये स्वार्थमतिहैन्यन्न तथा द्वयोरवस्थयोः। अत आह प्रपुरुषः दादातुलसीदासः–

**स्वारथ लाग करे सब प्रीति।**

**सुर नर मुनि जन सबकी यह रीति।**

स्वार्थमतौ भ्राता भ्रातरं स्वसा स्वसारमात्मानन्न वेद। तत्र हेतुः स्वार्थः अपरो हेतुस्तत्र कामः कलत्रम्वेत्येकमेव। कामेन कामना कलत्रमुभयं ग्रहीतव्यम्। अपरस्मात्सदनादागत्य शोणितेन भिन्नेन कलत्रमनुदारन्न स्वसम्बन्धिनं तथा प्रीणाति यथा स्वसदने। सागत्य स्वार्थसमीहते, सम्बन्धिनां समर्पणं न वेत्ति, केवलं पतिसाधनमवलोक्य निम्रोच्चभावनामभिपाल्य चेतसि तथाचरतीति। सा नटी स्वनटं पतिं यथा व्याहरति स नटोऽपि तस्या वश्यो भूत्वा तथैव परिवारसमाज–राष्ट्ररंगमंचेऽनिशं नृत्यतीति को न वेद। सर्वः सर्वजातमिदं व्यवहरणमिवज्ञायापि स्त्रीरुपिनीमायावश्यो भूत्वा मर्कटमिव स्वपुरुषं नर्तयतीति चाप्तवाक्यमिह सुष्ठूद्धरामि। भगवान् शंकरः उमां सम्बोध्य रामायणे निगदति तदिव द्रष्टव्यमवहितचेतसा –

**"उमा दारु योषित् की नाई सबहि नचावत राम सोसाई।"**

यद्यपि **"नरस्य धर्म्या नारी, भवति अर्थात् नरमधर्मपथादभिरक्षति यतो हि"** धर्मादनपेतं धर्म्यमिति निरुक्तिः। या धर्म्या सा नारी। या एषा सा कथं नरं विपथयेत्परमेनां निरुक्तिं विस्मृत्य स्वार्थमेवेहत इति।

**"पत्युर्नो यज्ञ संयोगे"** इति पाणिनीयेन निर्मितः पत्नीतिशब्दः पत्नीमुच्चं स्थापयति। विना पत्न्या यज्ञविधिर्न सफलः। अनेनास्या महिमानं गरिमाणं ज्ञातुं शक्यते तथाप्येष शब्दः कथमद्य विदूयत इति विमर्शनीयम्। अत्र तृतीयो हेतुरन्धधावनं मृगमरीचिकावत्। जगतः असारस्य चाकचम्ये सचक्षुरप्यचक्षुष्को भूत्वाऽन्धोन्नयनाय सम्बन्धिनं परिवारं राष्टन्नभिवीक्ष्यात्मभोगाय प्रेरितो भूत्वा वित्ताय प्रधावति अत आह भगवानाद्यः शंकरः –

पश्यन्नपि नहि पश्यति लोकः ह्युदरनिमित्तं बहुकृतवेषः।

वेदोऽपि तथैवाभिवदन्नभिलक्षितुं शक्यः –

**उत त्वः पश्यन्न ददर्श वाचं।**

**उत त्वः शृण्वन्न शृणोत्येनाम्॥**

रामायणे भातृत्वप्रेम्णः पराकाष्ठा दृश्यते। रामं प्रतित्रयाणां भातृणां भक्तिरद्यापि सर्वस्मा उपदिशति, यत्भ्रातृभिरेवमेव प्रीतिमद्भिर्भवितव्यम्। महाभारते तेषां प्रीतिर्द्वेषश्चेति द्वयं रूपं दृग्गोचरीभवति। युधिष्ठिरादिभातृणामेकतः प्रीतिस्तान् प्रत्येव दुर्योधनादिभातृणां द्वेषस्तत्रैव तेषां दुर्योधनादीनां शतभातृणामप्यद्भुतं प्रेम एवं परस्परं भक्तिः विरक्तिश्च तत्र स्वानामपरेषामेव बुद्धिर्बलीयसी।

द्वेष आसुरीवृत्तिः प्रीतिश्च दैवीवृत्तिः। द्वयोरन्यतरस्यामंगीकारश्चेदैवीसम्पदैव स्वीकर्त्तव्या। नात्यन्तिकविनाशो विद्वेषस्य तथाप्युच्चस्थाने का तिष्ठेदिति विम्रष्टव्यम्। तुलसीदासो ब्रूते तद् द्रष्टव्यं यथा –

**"सुमति कुमति सब के उर रहहि।"**

द्वेषेण कुमतिः प्रीत्या सुमतिरेव ग्रहीतव्या। अत्रोच्चस्थानं सुमतिद्वैव भजते। अतः पूर्वत्रापि बहुशो मया रामायणं स्मर्यते।

**॥ जहाँ सुमति तहाँ सम्पत्ति नाना जहाँ कुमति तहाँ विपत्ति निधाना॥**

वेदोक्तां सूक्तिमंगीकृत्यात्मनि परवर्तिभिस्समैः स्वस्वकाव्यग्रन्थेषु अनूद्य भाषान्तरं विधाय स्वाभिप्रायः उदितः। भागवते आह –

**तदेव रम्यं वचसां वचो यत्।**

**नवं नवं भाविविभावसख्यम्॥**

- **अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः। जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्॥**

सन्दर्भितमिदं सूक्तमाथर्वणम्। प्रसंगतस्तु अभिज्ञातं पुत्रस्य व्यवहृतिः मात्रा सत्रा कथं पितुरनुकरणन्तस्य च कथमिति। जाया पत्ये कथं वाचं वदेदिति च। चतुर्णामत्र पारिवारिकाणामैकमत्यं कथं स्याद्येन परिवारे विवदनं न भवेदिति कामयमानेन ऋषिणात्र मन्त्रो दृष्टः सश्चेह विमृश्यते।

पुत्रेण मात्रा पित्रा च साकं कथं स्थातव्यं व्यवहर्तव्यमाचरणीयञ्चेत्यधिकृत्य वृत्तमिह मन्त्रेण स्वभावः प्रदर्शितः। मन्त्रः जगाद पुत्रः पितुरनुव्रतः स्यात्। अनुव्रतेनेहानुगामिना वश्येन वा भवितव्यम्। पितुरनुव्रतस्य पुत्रस्यैव पुत्रत्वं प्रदर्शितम्।

**"यः प्रीणयेत् सुचरितैः सपुत्रः"** इति नीतौ पुत्रस्य लक्षणलक्षितत्वात्।

- **ब्रह्मचर्येण तपसा राजा राष्ट्रं विरक्षति। आचार्यो ब्रह्मचर्येण ब्रह्मचारिणमिच्छते। अथर्व० 11/5/17**

आथर्वणोऽयं मन्त्रः ब्रह्मचर्यस्य गरिमाणं विवृण्वन् तेन को लाभ इति प्रोच्चमाह। ब्रह्मचर्य्यमित्यत्राह यद् ब्रह्म वेदस्तमाचरणे धारयेत्। ब्रह्मविधानमिवाचरणं वा ब्रह्मचर्य्यम्। किं तद् ब्रह्मविधानमित्युक्ते पुनराह, ब्रह्मणा वेदेन यत्प्रणिहितं तद् ब्रह्मविधानम्। विधानमित्यनेन विधिः स्वीकार्यः। धर्मस्यापरो हि पर्यायो विधिः। अतः भागवतम् आह –

**वेद प्रणिहितो धर्मोह्यधर्मस्तद्विपर्ययः।**

**वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुम॥** 6/1/40